# संस्कृतवार्ताः

## 21.11.2024

## सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्री नरेन्द्रमोदी गयानाया: सर्वोच्चराष्ट्रियसम्मानेन ‘द ऑर्डर ऑफ-एक्सिलेंस’ इत्यनेन सम्मानितो जाता:। असौ प्राप्तसम्मानं समग्रभारतीयेभ्य: समर्पितवान्।

· प्रधानमन्त्री मोदी अद्य सायं जॉर्जटाउन-नगरे गयानाया: संसदं सम्बोधयिष्यति।

· रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् दुर्बोधगतानाम् अन्ताराष्ट्रिय-समस्यानां समाधानार्थं भारतेन  सर्वदा संवाद:  एव समर्थितः  इति।

· राष्ट्रपति: द्रौपदीमुर्मुः  नवदिल्ल्याम् डा. हरेकृष्ण-महताब इत्येतस्मै श्रद्धाञ्जलिम् अददात्। तस्य पञ्चविंशत्यधिकैक-शत- तमस्य जन्मजयन्त्यवसरस्य सम्माने विशेषस्य स्मारकपत्रस्य एकस्या: मुद्राया: च विमोचनं जातम् ।

· आईसीसी इत्येतस्य पुरुषाणां टी-20-  अन्ताराष्ट्रिय-क्रीडक- शीर्षके  भारतस्य हार्दिक पांड्या: आल राउंडर इत्यस्यां नवीनतमश्रेण्यां प्रथमस्थानं पुनः प्राप्तवान्।

<u>प्रधानमन्त्री-गयाना</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य गयानाया: सर्वोच्चराष्ट्रियसम्मानेन ‘’द ऑर्डर ऑफ-एक्सिलेंस’ इत्यनेन सम्मानितो जाता:। तस्मै सम्मानमिदं तस्य विकासशील-देशानाम् अधिकाराणां वैश्विक-मञ्चेषु समर्थनाय वैश्विकसमुदायाय च अद्वितीय -सेवा: भारत-गयाना-देशयो: च सम्बन्धान् प्रबलीकर्तुं  प्रदत्तम् इति। गयानाया: राष्ट्रपति: डॉ. इरफान -अली-इत्येष: गयाना-स्टेट-हॉउस-इत्यत्र श्रीमोदिने सम्मानमिदं प्रदत्तवान्। सम्मानं प्राप्य श्रीमोदी डॉ. इरफान अली-इत्यस्मै धन्यतावचांसि समर्पितवान्। असौ प्राप्त- सम्मानं समग्रभारतीयेभ्य: उभयो: देशयो: मध्ये निहितेभ्य: इतिवृत्तगतेभ्य: सम्बन्धेभ्य: च समर्पितवान्। असौ सबलं प्रतिपादितवान् यत् तस्य इयं गयानायात्रा भारत-गयाना-देशयो: मैत्रीपूर्ण-सम्बन्धं इतोऽपि सुदृढीकरणदिशि भारतस्य सतत-प्रतिबद्धताया: प्रमाणमस्ति इति। प्रधानमन्त्री मोदी अद्य सायं जॉर्जटाउन-नगरे गयानाया: संसदं सम्बोधयिष्यति।

## रक्षामन्त्री राजनाथसिंहः

रक्षामन्त्री राजनाथसिंहः अद्य उक्तवान् यत् दुर्बोधगतानाम् अन्ताराष्ट्रिय-समस्यानां समाधानार्थं भारतेन सर्वदा संवादः एव समर्थितः इति। लावोस्-देशस्य वियेनतियाने-नगरे एकादशमम् आसियान्-देशस्य सम्मेलनम् सम्बोधयता, मन्त्रिणा कथितं यत् मुक्तसंवादस्य शान्तियुतवार्तालापस्य च एषा प्रतिबद्धता सीमाविवादात् आरभ्य व्यापारसमन्वयेभ्यः यावत् अन्ताराष्ट्रियप्रतिसन्धिं प्रति भारतस्य समीकरणे स्पष्टम् अस्ति इति। सः अवदत् यत् भारतं वैश्विकसमस्यानां वास्तविकं दीर्घकालिकं च समाधानम् तदा एव साधयितुं शक्नोति यदा राष्ट्राणि परस्परं दृष्टिकोणस्य आदरं कृत्वा रचनात्मकरूपेण संलग्नानि भवन्ति इति। श्रीसिंहः अवदत् यत् विश्वस्य विभिन्नेषु भागेषु प्रचलन्तान् संघर्षान्, अन्ताराष्ट्रिय-व्यवस्थायाः च समाह्वनानि च विचार्य ते लावोस्-देशे समागच्छन्ति इति प्रासङ्गिकम् अस्ति। सः अवदत् यत् लावोस्-देशः बहुकालात् अहिंसायाः शान्तेः च बौद्धसिद्धान्तान् आन्तरिकीकृतवान् अस्ति इति।

रक्षामंत्री अवदत् यत् भारतम् भारत- प्रशान्तप्रदेशे शान्तेः समृद्धेः च प्रोत्साहने नौपरिवहनस्य, विमानयानस्य च स्वातन्त्र्यस्य, निर्विघ्नस्य विधिसम्मतस्य वाणिज्यस्य, अन्ताराष्ट्रियविध्याः पालनस्य च पक्षे वर्तते इति। ऋतुदश परिवर्तनम् आलक्ष्य श्रीसिंह: वैश्विक सहभागित्वस्य अवधारणायै बलम् प्रदत्तवान्।

## राष्ट्रपतिः

राष्ट्रपति: द्रौपदीमुर्मुः अद्य नवदिल्ल्याम् उत्कल-केसरी उपाधिना विभूषिताय , डा. हरेकृष्ण-महताब् इत्येतस्मै श्रद्धाञ्जलिम् अददात्। डा. हरेकृष्ण-महताबस्य पञ्चविंशत्यधिक-एक-शत - तमस्य जन्मवार्षिकस्य उत्सवस्य उद्घाटनम् कुर्वती राष्ट्रपतिः मुर्मु: डा. महताबस्य सम्मानार्थं विशेषस्य स्मारकपत्रस्य मुद्राया: च विमोचनस्य अवसरे हर्षं प्रकटितवती। अनया निगदितं यत् डा. हरेकृष्ण महताबस्य लेखनैः भाषणैः च सा सर्वदा प्रेरिता च भवतीति।

## कर्मचारि भविष्यनिधि सङ्घटनम्

कर्मचारि-भविष्यनिधिसङ्घटनेन (ईपीएफओ) इत्यनेन अस्मिन् वर्षे सितम्बरमासावधौ एव एकाशीत्युत्तराष्टदशलक्षस्य सदस्यानां शुद्धसंवर्धितं पञ्जीकरणं कृतम्। यद्धि गतवर्षस्य समानकालखण्डात् त्रयस्त्रिंशद्द-शमलवोत्तर-नवप्रतिशतं वृद्धिं प्रदर्शयति। श्रम-मन्त्रालयेन उक्तं

यत् सदस्यानां वृद्धौ कारणभूताः वर्धमान-वृत्त्यवसराः, कर्मचारि-लाभानां विषये जागरूकतायाः वर्धनम्, ईपीएफओ-संस्थायाः प्रभावि-प्रसार-उपक्रमाः च भवितुम् अर्हन्ति। एतेषु सदस्येषु अष्टादशतः पञ्चविंशतिवयोदेशीयाः आधिक्यं भजन्ते यतो हि प्रतिशततायां तेषां सङ्ख्या ऊनषष्टिप्रतिशतं वर्तते ।

प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी अस्मिन् मासे पञ्चविंशति दिनाङ्के नवदिल्लीनगरस्य भारतमण्डपे 'आई.सी.ए. ग्लोबलकोआपरेटिव्' इति सम्मेलनस्य उद्घाटनं करिष्यति। अद्य पत्रकारसम्मेलनं सम्बोधयन् सहकारिता-मन्त्रालयस्य सचिवेन डॉ. आशीषकुमारभूटानी इत्यनेन उक्तं यत् भारते प्रथमवारं वैश्विकसहकारसम्मेलनस्य महासभायाः च आयोजनं क्रियते। सः अवदत् यत् श्रीमोदी अन्ताराष्ट्रियसहकारिवर्षस्य द्विसहस्रपञ्चविंशतितमस्य स्मारकमुद्रां प्रख्यापयिष्यति। षड्दिवसीय-सम्मेलनस्य विषयः "सहकारिणः सर्वेषां कृते समृद्धिं निर्मान्ति" इति वर्तते ।

भारतीय- अन्ताराष्ट्रिय-चलच्चित्रमहोत्सवस्य

पञ्चपञ्चाशत्तमस्य भारतीय- अन्ताराष्ट्रिय-चलच्चित्रमहोत्सवस्य आयोजनं सोत्साहं पूर्णरूपेण च प्रचलति, यत्र प्रदर्शनानि कार्यक्रमाश्च आयोज्यन्ते। अद्य विविध-विधानां भूयोऽपि चत्वारिंशत् चलच्चित्राणि प्रदर्श्यन्ते, येषु भारतीयचलच्चित्रस्य उत्तमानि चित्राणि सम्मिलितानि वर्तन्ते। भारतीय-पेनोरमा-खण्डः अपि आधिकारिकरूपेण स्वीयेन उद्घाटन-समारोहेन सह आरभत, यस्मिन् चितानां पञ्च विंशति फ़ीचर्-इति चलच्चित्राणां, विंशतिः च नॉन -फ़ीचर्-इत्येतेषां चलच्चित्राणां च प्रदर्शनस्य कृते मञ्चः तत्र निर्मितः। प्रख्याताः चलच्चित्र-जगतः प्रमुखजनाः प्रमुख-वर्गाणां , समूह-चर्चाणां च माध्यमेन प्रेक्षकैः सक्रियतया संलग्नाः भवन्ति, चलच्चित्रनिर्माणकलायाः विषये बहुमूल्य- अन्तर्दृष्टिं प्रदास्यन्ति। एतदतिरिच्य, फिल्म्-बजार् इत्यस्य अष्टादशतमं संस्करणम् अपि क्रियाकलापैः परिपूरितमस्ति, यद्धि महत्त्वाकांक्षी-चलच्चित्र-निर्मातृणां स्थापित-उद्योग-वृत्तिकर्तृणां च मध्ये सम्पर्कस्य सहयोगस्य च गतिशील-केन्द्ररूपेण कार्यं समाचरति ।

प्रसारभारती

प्रसार-भारत्याः अध्यक्षः नवनीत-कुमार-सहगलः अद्य प्रावोचत् यत् प्रसार-भारत्याः नवीनस्य ओटीटी-प्लेटफॉर्म-इत्येतस्य अनावरणस्य उद्देश्यं न केवलं डिजिटलस्पेस इत्यत्र समाजोचित-सामग्रीणां सङ्कलनम् अपितु बालाः युवानः च समेत्य समाजस्य समेभ्यः वर्गेभ्यः सामग्री-सङ्कलनमपि वर्तते। राष्ट्रियप्रसारकस्य प्रसारभारत्याः ओटीटी-प्लेटफॉर्म-वेब्स-इत्यस्य अनावरणस्य एकदिवसानन्तरं वार्ताहरान् सम्बोधयन् श्रीसहगलः सूचितवान् यत् एतस्मिन् अनुप्रयोगे दूरदर्शनस्य पूर्ववर्तिनां समेषां कार्यक्रमाणां सामग्र्यः भविष्यन्ति यान् अवलोक्य जनाः वृद्धाः जाताः। अपि च न्यासाधारिताः क्षेत्रीय-सांस्कृतिक-कार्यक्रमाः अत्रैव समाविष्टास्सन्ति इति।

क्रिकेट्-क्रीडा

आईसीसी इत्येतस्य पुरुषाणां टी-20- अन्ताराष्ट्रिय -क्रीडक- शीर्षांके भारतस्य हार्दिक पांड्याः आल राउंडर इत्यस्यां नवीनतमश्रेण्यां प्रथमस्थानं पुनः स्व्यकरोत्। वल्लन-क्रीडायां भारतस्य तिलकवर्मा तृतीयस्थाने , तदनन्तरं सूर्यकुमार-यादवः चतुर्थस्थाने स्तः। यशस्वी जैसवालः तु एकस्थानं पतित्वा अष्टमं स्थानम् अवाप्नोत्।

।।इति वार्ता:।।